पाणिरनासाद्यचंद्रगुप्तमाच्छायावैरोचकं हतस्तपस्वीवर्वरकः ततोदारुवर्म्मणायंत्रतोरणमात्मवि-
नाशाफलमवधार्य्यशीघ्रमेवोत्तुंगतोरणमधिरूढेन यंत्रघटनवीजं लोहकीलकमादायहस्तिनी
गत एव हतस्तपस्वीवैरोचकः राक्षसः हाकष्टमनर्थद्वयमापतितं नहतश्चंद्रगुप्तोहतौवर्वरक-
वैरोचकौ नहतौतौसर्वथावयमेवहताः अथससूत्रधारोदारुवर्माकथं विराधगुप्तः वैरोचक
पुरस्सरेणपदातिलोकेनैकलोष्टघातेनहतः राक्षसः सास्रं कष्टमहोवत्सलेनसुहृदाविप्रयु

CC-0. In Public Domain. Digitized by eGangotri

ष्टाःहा अथतत्रतेनभिषजाभयदत्तेनकिमनुष्ठितं विराधगुप्तः सर्वमनुष्ठितं राक्षसः अपिसखेहत
श्चन्द्रगुप्तहतकः विराधगुप्तः अमात्यदेवान्नहतः राक्षसः सविषादं तत्किमिदानींकथयसिसर्व
मनुष्ठितमिति विराधगुप्तः अमात्यकल्पितमनेनविषयोगचूर्णमिश्रमौषधंचंद्रगुप्ताय तच्च
प्रत्यक्षीकुर्वताचाणक्यहतकेनपानभाजनेवर्णान्तरगतमुपलभ्याभिहितंचंद्रगुप्तः वृषलवृष
लसविषमौषधंनपातव्यमिति राक्षसः शठःखल्वसौवटुः अथवैद्यःकथं विराधगुप्तः आ
त्मविनाशः तदेवौषधंपायितोमृतश्च राक्षसः महाकार्यराशिरुपरतः अथतस्यशय
नाधिकृतस्यप्रमोदकस्यकिंवृत्तं विराधगुप्तः आत्मविनाशः राक्षसः सोद्वेगं कथमिव विरा २३
धगुप्तः सखलु[illegible]खेःसंभुष्यामिरतिः[illegible]महांतमर्थराशिमवाप्यमहताव्ययेनोपभोक्तुमारब्ध

CC-0. In Public Domain. Digitized by eGangotri

वान् कुतोभूयः स्वनागमस्तवेति स्वध्यमानोयदावाक्यमेवानवह्नगदत्तदाचाणक्यहतकादेशाद्विचित्रे
ण बधेन व्यापादितः राक्षसः सोद्वेगं कथमत्रापि दैवेनोपहतावयं अथशयितस्य चंद्रगुप्तस्य श
रीरे प्रहर्त्तुमस्मत्प्रयुक्तानां नरपतिशयनगृहस्यांतः सुरंगामेत्य प्रथममेव निवसतां वीभत्सकादी
नां को वृत्तांतः विराधगुप्तः अमात्य दारुणो वृत्तांतः राक्षसः सावेगं नखलु विदितास्तेवसंतः
विराधगुप्तः अथ किं प्राक् चंद्रगुप्तप्रवेशात् प्रविष्टमात्रेणैव शयनगृहे दुरात्मनावलोकितं चाणक्य
हतकेन तस्माद्भित्तिछिद्रगृहीतभक्तावयवां निष्क्रमंतीं पिपीलिकापंक्तिमवलोक्य पुरुषगर्भमित
दृहमिति गृहीतार्थेन दाहितं तदंतः शयनगृहं तस्मिंश्च दह्यमाने धूमाभिरुद्धदृष्टिविषयाः प्रथ
मुविहितमनुपगम्य द्वारं तदैव संतापाद्दुरात्मानस्सर्वएवोपरताः राक्षसः सचिंतं कष्टं कन्यात

स्ववधाय यया विषमयी गूढं प्रयुक्ता मया दैवात्पर्वतकस्तया विनिहतो यस्तस्य राज्यार्द्धहृत् येनास्त्रेषु रसे
ष्वपि च प्रणिहितास्तैरेव ते घातिता मौर्य्यस्यैव फलंति पश्यत विविधश्रेयांसि मन्नीतयः १ विराधगुप्त
ः अमात्य तथापि प्रारब्धमपरित्याज्यमेव खलु पश्यत्वमात्यः प्रारभ्यते न खलु विघ्नभयेन
नीचैः प्रारभ्य विघ्नविहता विरमंति मध्याः विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमगु
णास्त्वमिवोद्वहंति १ अपि च किं शेषस्य भरव्यथा न वपुषि क्ष्मां नो क्षिपत्येष यत्किं वा नास्ति
परिश्रमो दिनपतेर्नास्त्येव यन्निश्चलः किंत्वंगीकृतमुत्सृजन्कृपणवन्न्याश्लाघ्यो लज्जते निर्व्यू
ढिः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतं १ राक्षसः सखे प्रारब्धमपरित्याज्यमिति प्रत्यक्षमेतत २४
भवतः ततस्ततः विराधगुप्तः ततः प्रभृति चन्द्रगुप्तशरीरे सहस्रगुणमप्रमत्तश्चाणक्यो हत

CC-0. In Public Domain. Digitized by eGangotri

कः एष एतदीदृशं भविष्यतीति अन्विष्य अन्विष्य निगृहीतवान् कुसुमपुरनिवासिनो युष्मदीयानाम पुरु
षान् राक्षसः सावेगं अथ के के निगृहीताः विराधगुप्तः आदावेव क्षपणको जीवसिद्धिः सनिकारं न॰
गरान्निर्वासितः राक्षसः आत्मगतं एतत्तावच्छ कंचन निःपरिग्रहं स्थानभ्रंशः पीडयिष्यति प्रका दारपुत्रादिरहितं=३
शं सखे किमपराधमुद्दिश्य निर्वासितः विराधगुप्तः एष राक्षसप्रयुक्तो विषकन्यया पर्वतेश्वरं घाति
तवानिति राक्षसः आत्मगतं साधु कौटिल्य साधु कुतः परिहृतमयशो पयत्नः पातितमस्मासु नि
पातितोऽर्धराज्यहरः एकमपि नीतिबीजं बहुफलतामेति यस्य तव १ प्रकाशं ततस्ततः विराधगु
प्तः ततश्चन्द्रगुप्तशरीरमभिद्रोग्धुमनेन व्यापारिता दारुवर्माद्य इति नगरे प्रख्याप्य शकटदासः शू
लमारोपितः राक्षसः सास्रं हा सखे शकटदास अयुक्तस्तवायं मृत्युः अथवा स्वाम्यर्थे उपरतो न
शोच्यस्त्वमसि वयमेवानुशोच्याः ये नंदकुलविनाशेऽपि जीवितुमिच्छामः विराधगुप्तः अ

CC-0. In Public Domain. Digitized by eGangotri

मात्यनैतद्देवस्यसामर्थ्यएवसाधयितव्यमिति राक्षसः सखे अस्माभिरहमेवार्थमालंव्यनजिजीविषा
परलोकगतोदेवःकृतघ्नैर्नानुगम्यते १ विराधगुप्तः अमात्यनैवं राक्षसः।।सखेकथ्यतामपरस्या
पिसुहृद्व्यसनस्यश्रवणेसज्जोवयं विराधगुप्तः एतदुपलभ्यचंदनदासेनापवाहितंसौहार्देना।
मात्यकलत्रं राक्षसः सखेचाणक्यबटोःक्रूरस्यनार्पितमितिविरुद्धमयुक्तमनुष्ठितंचंदनदासेन
विराधगुप्तः नन्वयुक्तःसुहृद्द्रोहः राक्षसः ततस्ततः विराधगुप्तः ततोयाच्यमानेनापिना
र्पितममात्यकलत्रं ततःकुपितेनचाणक्यबटुना राक्षसः सावेगं नखलुव्यापादितः विरा
धगुप्तः अमात्यनव्यापादितः किंतुगृहीतगृहसारःसपुत्रकलत्रोबंधनागारेनिक्षिप्तः राक्ष
सः सखेतत्किंपरितुष्टःकथयसि अपवाहितंराक्षसकलत्रमितिननुवक्तव्यंसकलत्रोराक्षा २४
सइति ततःप्रविशत्यपटाक्षेपेणपुरुषः पुरुषः जअदुजअदुअमच्चो अज्जएसोखुस

संयतः २

CC-0. In Public Domain. Digitized by eGangotri

अउदासोपडिहारभूमिएउववट्टिदो राक्षसः अपिसत्यं अमच्चपदोपजीविलोअजणाणअ-
लीअंमंतिदुंजाणंदि राक्षसः सखेविराधगुप्तकथमेतत् विराधः अमात्यस्यादितदेवं यतोर-
क्षतिमवश्यंभवितव्यता राक्षसः प्रियंवदकयद्यागतोहि किंविचारयसि क्षिप्रंप्रवेशयमामाश्वास-
य पुरुषः जंअमच्चोआणवेदितिनिष्क्रान्तः ततःप्रविशतिशकटदासःसिद्धार्थकेनानुगम्य-
मानः स्वगतं दट्ठूणमोर्य्येमिवप्रतिष्ठितपदंस्थलंधरिब्यास्तलेतल्लक्ष्मीमिवविप्रनाशमथिनीमु
न्मुच्यकणएस्त्रजं श्रुत्वास्वामुपरोधरोधविषमानाघाततूर्य्यस्वनान्नध्वस्तंप्रथमाभिघात-
कठिनंमन्येमदीयंमनः १ नाट्येनावलोक्यसहर्षं अयममात्यराक्षसस्तिष्ठति यएवः अ-
क्षीणभक्तिःक्षीणेपिस्वाम्यर्थेधुरमुद्वहन् पृथिव्यांस्वामिभक्तानांप्रमाणेपरमेस्थितः १७

CC-0. In Public Domain. Digitized by eGangotri

पसत्य जयत्वमात्यः राक्षसः नाट्येनावलोक्य सहर्षं सखे शकटदास दिष्ट्या दृष्टोसि तत्परिष्वजस्व मां
शकटदासः तथा करोति राक्षसः मां परिष्वज्य इदमासनमास्यतां शकटदासः अनेन प्रिय^
सुहृदा सिद्धार्थकेन घातकान्विद्राव्य वध्यस्थानादपहृतोस्मि राक्षसः सहर्षं भद्र सिद्धार्थक काम
पर्याप्तमिदमस्य प्रियस्य यद्दीयते तथापि परिगृह्यतां स्वगात्रादवतार्य भूषणानि प्रयच्छति सि
द्धार्थकः गृहीत्वा पादयोः पतति यदाज्ञापयत्यमात्य इति नाट्येनोपविष्टः राक्षसः सखे शकटदा
स अथ कोयमस्य मे हृदयानंदस्य हेतुः शकटदासः सिद्धार्थकं निर्दिश्य अमात्यममसुहृदयं^
अयं खलु आ ऽपि द तत्करिष्ये
सिद्धार्थकः सिद्धार्थकः आत्मगतं अअं खु अज्जो पदेसो ता करिस्सं प्रकाशं तां इच्छामि एदं^
मुद्दिअं अमच्चस्स ज्जेव भंडाआरे विणिक्खिविदुं जदा मे एदिणा पओअणं ऊविस्सदि तदा गे २६
तदिच्छामि एतां मुद्रिकाममात्यस्यैव भांडागारे विनिक्षिप्तुं । यदा मे एतया प्रयोज
नं भविष्यति तदा गृहीष्ये =२

CC-0. In Public Domain. Digitized by eGangotri

णिस्स राक्षसः भद्रकोदोषः शकटदासएवंक्रियतां शकटदासः यदाज्ञापयत्यमात्यः मु

द्रांविलोक्य अमात्यनामांकितेयंमुद्रा राक्षसः विलोक्य आत्मगतं सत्यमस्मदुपकंगछिनो

दार्थंनगरान्निष्क्रामताममहस्तात्गृहीतागृहिएप्पा कथमस्यहस्तमुपागता प्रकाशं भद्र सि-

[अमात्य | अस्ति | कुसुमपुरे | मणिकारश्रेष्ठी | चंदनदासो]

द्धार्थककुतस्त्वयेयमधिगता सिद्धार्थकः अमच्च अत्थिकुसुमपुरे मणिआरसेट्ठी चंदणदासो-

[नाम | तस्य | गृहद्वारे | भूमौ | पतिता | मया | उपलब्धा | अमात्य | किं | अत्र]

णाम तस्सगेहदुवारे भूमिएपडिदामएउपलद्धा राक्षसः युज्यते सिद्धार्थकः अमच्चकिंएत्थ

[युज्यते]

जुज्जइ राक्षसः यतोमहाधनानांद्वारिएवंविधस्योपलब्धिरिति शकटदासः सखेसिद्धार्थक

अमात्यनामांकितेयंमुद्रातदितोबहुतरेणार्थेनभवंतममात्यस्तोषयिष्यतिदीयतामस्यामु-

द्रा सिद्धार्थकः अज्जणंएसोमेपरिओसोजंइमाएमुद्दाएअमच्चोविपरिग्गाहंकरेदित्ति मु

[आर्य ननु एष मे परितोषः यदस्याः मुद्रिकायाः अमात्यो विपरिग्राहं करोतीति =१]

CC-0. In Public Domain. Digitized by eGangotri

ज्ञानात्येव अमात्यः
तथा। चाणक्यब
टुकस्य विप्रियं कृ
ता नास्ति पुरे गोपा
टलिपुत्रे प्रवेश इ
ति। तदिच्छामि अ
हं अमात्यस्य एव
चरणौ शुश्रूषितुं ==२

ज्ञा समर्प्पयति राक्षसः सखे शकटदास अनयैव मुद्रया स्वाधिकारे व्यवहर्त्तव्यं त्वया शकटदासः यदा
अमात्य । विज्ञापित । व्यं किंचिदस्ति
ज्ञापयत्यमात्यः सिद्धार्थकः अमच्च विस्मद वं किंचिदत्थि राक्षसः ब्रूहि विश्रव्धं सिद्धार्थकः ज्ञा
णं दिजेव अमच्चो तथा चाणक्कवटुअस्स विप्पिअं कदुअ णत्थि पुरे गोपाटलिउत्ते पवेसोत्ति
ता इच्छामि अहं अमच्चस्स जेव चलणो सुस्सूसिदुं राक्षसः प्रियं नः त्वदभिप्रायापरिज्ञानांत
अनुगृहीतोस्मीति
हिंतोस्माकमनुनयस्तदेवं क्रियतां सिद्धार्थकः सहर्षं अणुगिहीदु इति राक्षसः शकटदास विश्रा
मय सिद्धार्थकः यथाज्ञापयत्यमात्य इति सिद्धार्थकेन सह निष्क्रांतः राक्षसः सखे विराधगु
प्तवर्णय वृत्तांतशेषं अपि क्षमंतेस्मदुपजापं चंद्रगुप्तप्रकृतयः विराधगुप्तः अमात्य बाढं क्ष
मंते ननु प्रकाशमवगम्यत एव राक्षसः सखे किं तत्र प्रकाशं विराधगुप्तः अमात्य इदं तत्र प्र ३७

CC-0. In Public Domain. Digitized by eGangotri

इति तेजस्वितया र

कार्य्ये ~~विराधगुप्तः अमात्यस्य तत्रभवकार्य्ये~~ मलयकेतोरपक्रमणात्प्रभृति कुपितश्चंद्रगुप्तश्चाण
क्यस्येति चाणक्योपि जितकाशितया तैस्तैराज्ञाभंगैश्चंद्रगुप्तचेतःपीडामुपचिनोति अयमदिम
मानुभवः राक्षसः सहर्षं सखे विराधगुप्त त्वमनेनाहितुंडिकछद्मना पुनः कुसुमपुरमेव व्रज तत्र
हि मे सुहृद्वैतालिकव्यंजनः स्तनकलशो नाम प्रतिवसति त्वया मद्वचनाद्वाच्यः चाणक्येन क्रिय
क्रोधोद्दीपनरूपैः=५ माणेष्वाज्ञाभंगेषु चंद्रगुप्तस्त्वया समुत्तेजनरूपैः श्लोकैरुपश्लोकयितव्यः कार्य्यं च निभृतं करभ दूतहस्ते
कहस्ते संदेष्टव्यमिति विराधगुप्तः यदाज्ञापयत्यमात्य इति निष्क्रांतः प्रविश्य पुरुषः जअदु
जअदु अमच्चो अमच्च सअडदासो विण्णवेदि एदे त्तिण्णि अलंकारजोआ विक्किणीअंति ता पच्चक्खीक
रेदु अमच्चो त्ति राक्षसः विलोक्य आत्मगतं अहो महार्हाण्याभरणानि प्रकाशं उच्यतां शकटदासः
परितोष्य विक्रेतारं गृह्यतामिति पुरुषः जं अमच्चो आणवेदि त्ति निःक्रांतः राक्षसः यावदहमपि कु

यदमात्य आज्ञापयति=१

जयत्वमात्य अमात्य शकटदासो विज्ञापयति एते त्रयः अलंकारयुग्माः विक्रीयते तान्प्रत्यक्षीकरोत्वमात्य इति =४

CC-0. In Public Domain. Digitized by eGangotri

सुमधुरायकरभकंप्रेषयामीति उत्थाय अपिदुरात्मनश्चाणक्याच्चंद्रगुप्तोभिद्येत अथवा मौर्य्ये तेजस्वि- तेजस्विनि=१
सर्वभूतलभुजामाज्ञापकोवर्त्ततेचाणक्योपिमदाश्रयादयमभूद्राजेति (चाणक्यः) जाततस्मयः राज्यप्राप्तिकृतार्थमे
कमपरं तीर्णप्रतिज्ञार्णवंसोहार्द्दात्कृतकृत्यतैवनियतंलब्धांतरामेत्स्यति इतिनिष्क्रांताः सर्वे द्वितीयो-
ऽंकः २ ॥ ॥ ॥ ॥ ॥ ॥ ततः प्रविशतिकंचुकी कंचुकी रूपादीन्विषयान्निरूप्य विषयीकृत्य=४
करणैर्यैरात्मलाभस्त्वयालब्धस्तेष्वपिचतुरादिषुहतास्वार्थावबोधक्रिया॥ अंगानिप्रसभंत्यजन्तिपटु
तामाज्ञाविधेयानिमेन्यस्तंमूर्द्धिपदंतवैवजरयातृष्णेमुधाताम्यसि १ परिक्रम्य आकाशे भोभोःसु
गांगप्रासादाधिकृताःपुरुषाः सुगृहीतनामादेवश्चंद्रगुप्तःसमाज्ञापयति प्रवृत्तकौमुदीमहोत्- आश्विनपूर्णि मायांराजानःकौ मुदीमहोत्सवंकु र्वंति२८=३
सवरमणीयतरंकुसुमपुरमवलोकयितुमिच्छामि तत्क्रियतामस्मद्दर्शनयोग्याःसुगांगप्रासा
दस्योपरिभूमयइति आकर्ण्य तत्किंकथयंतः आर्य्यकिमविदितमार्यंदेवस्यचंद्रगुप्तस्यकौ

CC-0. In Public Domain. Digitized by eGangotri

मुदीमहोत्सवप्रतिषेध इति आः देवोपहताः किमनेन वः आलापेनैव कथापोद्घातेन शीघ्रमि
दानीं आलिंगितुं गृहीतधूपसुरभिसक्तमाल्यैन वृस्रजः संस्पर्शैरिन्दुमयूखसंहतिरुचां सख्यामराणां
श्रियः सिंहासनधारणाच्च सुचिरं संजातमूर्छामिव छिन्नां चंदनवारिणा सकुसुमः सकौतुग्र
कानुंगा १ श्रुत्वा किं कथयंति भवंतः एते त्वरामहे इति भजस्त्वरध्वं त्वरध्वं अयमागत एव देवश्च
न्द्रगुप्तो य एषः सुविश्लिष्टैरंगैः पथिषु विषमेष्वप्यचलता चिरं धूर्यैर्नोढा गुरुरपि भुवो यस्य गुरु
णा धुरं तामेवोच्चैर्नववयसि वोढुं व्यवसितो मनस्वी दम्यत्वात्स्खलति न च दुःखं न सहते १ कंचुकी
इतइतो देव ततः प्रविशति राजा प्रतीहारी च राजा आत्मगतं राज्यं हि नाम राजधर्मानुवृत्ति पर
स्य नृपतेर्महदप्रीतिस्थानं कुतः परार्थानुष्ठाने जडयति नृपं स्वार्थपरता परित्यक्तस्वार्थो नियतम
यथार्थः क्षितिपतिः परार्थश्चेत्स्वार्थादभिमततरो हंत परवान् परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः १

CC-0. In Public Domain. Digitized by eGangotri

अपिच दुराराध्याराज्यलक्ष्मीरात्मवद्भिरपिराजभिः कुतः तीक्ष्णादुद्विजतेमृदौपरिभवत्रासान्नसंति
ष्ठतेमूर्खंद्वेष्टिनगच्छतिप्रणयितामत्यंतविद्वत्स्वपि शूरेभ्योप्यधिकंबिभेत्युपहसत्येकांतभीरूनहो
लब्धावसरेव=३ श्रीर्लब्धप्रसरेववेशवनितादुःखोपचर्य्याभृशं १ अन्यच्च कृतककलहंकृत्वास्वतंत्रेणत्वयाकिं
आर्य्यचाणिक्यस्यादेशः=४ चित्कालांतरंव्यवहर्त्तव्यमिति आर्य्यादेशः सचकथमपिमयापातकमिवाभ्युपगतः अथवा सदा
र्य्योपदेशसंस्क्रियमाणमतयः सर्वदैवस्वतंत्रावयं कुतः इहविरचयन्साध्वीशिष्यः क्रियांननिवा
र्य्यते त्यजतिहियदामार्गंमोहात्तदागुरुरंकुशः विनयरुचयस्तस्मात्संतःसदैवनिरंकुशाःपर
मतः स्वातंत्र्येभ्योवयंनपराङ्मुखाः १ प्रकाशं आर्य्यवैहीनरसुगांगप्रासादमावेदय कंचुकी इ
तइतोदेव परिक्रम्य अयंसुगांगएवप्रासादःशनैरारोढुमर्हति राजा नाट्येनारुह्यदिशोविलो
क्यच अहोसरत्समयसंभृतशोभाविभूतीनांदिशामतिशयरमणीयता कुतः शनैःशनैःकाराः २९

CC-0. In Public Domain. Digitized by eGangotri

सितजलधरच्छेदपुलिनाः पुरस्तादाकीर्णाः कलविरुतिस्सारसकुलैः चिताश्चित्राकारैर्निशि विक-
चनत्तनकुमुदैर्नभस्तः स्पंदंते सरित इव दीर्घा दश दिशः ॥ १ ॥ अपिच अपांसद्वृत्तानां निजमुप-
निर्मलतादिकं र\ दिशंत्या स्थितिपदं दधत्याशालीनामवनतिमुदारे सतिफले मयूराणामुग्रं विषमिव हरंत्याम-
दमहो कृतः कृत्स्नस्यायं विनयइव लोकस्य शरदा ॥ १ ॥ इमांच भर्तुस्तथा कलुषितां व्रजवन्न भ-
स्यकं बालकथंचिदवतीर्यंतनूभवंती सर्वात्मना रतिकथा चतुरैव दूती गंगां शरन्नयति सिंधुपतिं
वक्तुं ॥ १ ॥ समंतान्नाय्येनावलोक्य अये तत्कथमप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरं आर्य्य वैहि-
नरे अथास्मद्वचनादाघोषितः कुसुमपुरे कौमुदीमहोत्सवः कंचुकी देव अथ किं आघोषि-
तो देवस्याज्ञया कुसुमपुरे कौमुदीमहोत्सवः राजा आर्य्य तत्किं न गृहीतमस्मद्वचनं पौरैः
जनेन कंचुकी कर्णौ पिधाय देव शांतं पापं अस्खलितपूर्वं हि पृथिव्यां देवस्य शासनं कथं पौरेषु

CC-0. In Public Domain. Digitized by eGangotri

भुस्खलितुमर्हति आर्य्य वैहीनरे यद्येवं तत्किमर्थमप्रवृत्तकौमुदीमहोत्सवमद्यापि कुसुमपुरं पश्यामि पश्य
धूर्त्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्य्यो नालंकुर्वंति रथ्याः पृथुजघनभराक्रांतिमंदैः प्रयातैः
अन्योन्यं स्पर्द्धमाना न च गृहविभवैः स्वामिनो मुक्तशंकाः साकं स्त्रीभिर्भजंते विधिमभिलषितं पार्व-
णं पौरमुख्याः १ कंचुकी देव एवमेव राजा किमेतत् कंचुकी अतह्दं राजा आर्य्य स्फुटमभिधी
यतां कंचुकी देव प्रतिषिद्धः कौमुदीमहोत्सवः राजा सक्रोधं आर्य्य केन कंचुकी देव नातः परम
स्माभिर्देवो विज्ञापयितुं शक्यते राजा आर्य्य न खलु आर्य्य चाणक्येनापहृतः प्रेक्षकाणामतिशयर
कौमुदीमहोत्सवः ३ मणीयश्चक्षुषो विषयः कंचुकी देव न जीवितुकामो देवस्य शासनमुल्लंघयिष्यति राजा सक्रोधं
शोणोत्तरे उपवेष्टुमिच्छामि प्रतीहारी देव इदं सिंहासनं उपविशतु देवो राजा नाट्येनोपविश्य
आर्य्य वैहीनरे चाणक्यमह्नितक्रियंतं द्रष्टुमिच्छामि कंचुकी यदाज्ञापयति देव इति निष्क्रांतः त

CC-0. In Public Domain. Digitized by eGangotri

तः प्रविशति स्वभवनं कृतासनपरिग्रहः कोपानुविद्धां चिंतां नाटयन् चाणक्यः चाणक्यः कथं स्प
र्द्धते मया सह दुरात्मा राक्षसः कुतः कृतागाः कौटिल्यो भुजंग इव निर्य्याय नगराद्यथा नंदं हत्वा नृपतिमक
रोन्मौर्य्यं वृषलं तथाहं मौर्य्येंदोः श्रियमपहरामीति हतधीः प्रभावं मद्बुद्धेरतिशयितुमेष व्यवसितः अतिक्रांतुं=३
१ प्रत्यक्षवदाकाशे लक्ष्यं बध्वा राक्षस रे विरम्यतां विरम्यतामस्माद्व्यवसितात् कुतः उत्सिक्तः कु उद्धतः ४
सचिवदृष्टराज्यतंत्रो नंदो सो न भवति चंद्रगुप्त एषः चाणक्यस्त्वमपि च नैव केवलं ते साधर्म्यं मदनु मंत्रिकुत्से:=५
कृतेः प्रधानवैरं १ विचिंत्य नातिमात्रमस्मिन् वस्तुनि मया मनः खेदयितव्यं कुतः मद्भृत्यैः किल
रूपांतरैः=२ नाम पर्वतसुतो व्याप्तः वेषांतरैः सद्युक्ताः स्वनियोगसाधनविधौ सिद्धार्थकाद्याः स्पशाः कृत्वा संप्रति
कृत्रिमं च कलहं मौर्य्येंदुना राक्षसं भेत्स्यामि स्वमतेन भेदकुशलो ह्येष प्रतीपं द्विषः १ प्रविश्य कंचुकी
कंचुकी कष्टा खलु सेवा नाम कुतः भेतव्यं नृपतेस्ततः सचिवतो राज्ञस्ततो वल्लभादन्येभ्यश्च भवंति ये
प्रतिकूलशत्रून्=२

CC-0. In Public Domain. Digitized by eGangotri

मौविश्रीवैस्य
मनुज्ञाविलमस्य

स्वमिभवनेलब्धप्रतिष्ठांविशः दैन्यादुन्मुखदर्शनोपलपनैःपिंडार्थमायासितः सेवांलाघवकारिणीं कृत-
धियः स्थानेश्ववृत्तिंविदुः १ परिक्रम्यावलोक्यच इदमार्य्यचाणक्यस्यगृहं यावत्प्रविशामि नाट्ये-
नप्रविश्यावलोक्यच अहोराजाधिराजस्यमंत्रिणोगृहविभूतिः उपलशकलमेतद्भेदकंगोमया-
नांवटुभिरुपहृतानांबर्हिषांस्तोममेतत् शरणमपिसमिद्भिःशुष्यमाणाभिराभिर्विनमितपटला-
न्तंदृश्यतेजीर्णकुड्यं १ तत्स्थानेऽस्यवृषलोदेवगंधगुणैः स्तवंत्यश्रांतास्याःक्षितिपतिविभूतैर-
पिगुणैःप्रवाचःकार्पण्याद्यदवितथवाचोपिकवयः प्रभावस्तृष्णायाःसखलुसकलःस्यादितरथा
निरीहाणामीशस्तृणमिवतिरस्कारविषयः १ विलोक्यसभयं अये अयमार्य्यचाणक्यस्तिष्ठ-
ति एषः योनंदमौर्य्यनृपयोःपरिभूयलोकमस्तोदयावदिशदप्रतिभिन्नकालं पर्य्यायपातितहि- ३१
मोऽसमसर्वगामीधाम्नातिशाययतिधामसहस्रधाम्नः १ जानुभ्यांभूमौनिपत्यजयत्वार्य्यः चाण

क्यः नाद्येनावलोक्य वैहीनरे किमागमनप्रयोजनं कंचुकी आर्य्यप्रणतिसंभ्रमचलितभूमिपाल
मौलिमणिमालाशिखापटलपिशंगीकृतपादपद्मयुगलः पादपद्मयोरार्य्यस्यप्रणिपत्य देवश्चंद्र
गुप्तो विज्ञापयति अकृतक्रियांतरायमार्य्यं द्रष्टुमिच्छामीति चाणक्यः नखलु वृषलस्याश्रवणपथ
मागतोयं कौमुदीमहोत्सवप्रतिषेधः कंचुकी आर्य्य अथ किं चाणक्यः सक्रोधं आः केन कथितं कं
चुकी भयं नाटयति प्रसीदत्वार्य्यः स्वयमेव सुगांगप्रासादगतेन देवेनावलोकितमप्रवृत्तकौमुदीम
होत्सवं कुसुमपुरं चाणक्यः तिष्ठत ततो भवद्भिरेवमंतरेण प्रोत्साह्य कोपितो वृषलः किमन्यत् कंचु
की सभयमधोमुखस्तिष्ठति चाणक्यः अहो राजपरिजनस्य चाणक्यस्योपरि प्रद्वेषपक्षपातः अथ
क्व वृषलस्तिष्ठति कंचुकी सुगांगप्रासादगतेन देवेनाहमार्य्यस्य पादमूलं प्रेषितः चाणक्यः उत्थाय कं
चुकिन् सुगांगप्रासादमादेशय कंचुकी इतइत आर्य्य उभौ परिक्रामतः कंचुकी आर्य्य अयं सुगांग

CC-0. In Public Domain. Digitized by eGangotri

प्रासादः शनैः शनैरारोढुमर्हत्यार्य्य इति चाणक्यः नाट्येनारुह्यावलोक्य च सहर्षमात्मगतं अये सिंहासन
मध्यास्ते वृषलः साधुसाधु नन्दैर्वियुक्तमनपेक्षितराजराजैरध्यासितं च वृषलेन वृषेण राज्ञा सिंहा
सनं सदृशपार्थिवसंगतं च प्रीतिं त्रयः प्रगुणयन्ति गुणा ममैते १ उपसृत्य विजयतां वृषलः राजा आस
नादुत्थाय आर्य्य चन्द्रगुप्तः प्रणमति चाणक्यः पाणौ गृहीत्वा वत्स तिष्ठ तिष्ठ पठ आशैलेन्द्राच्छि
लान्तस्खलितसुरनदीशीकरासारशीतादानीरान्नैकरागस्फुरितमणिरुचो दक्षिणस्यार्णवस्य आ
गत्यागत्य भक्तिप्रणतनृपशतैः शश्वदेव क्रियन्तां चूडारत्नांशुगर्भास्तव चरणयुगस्याङ्गुलीरन्ध्रभा
गाः १ राजा आर्य्यप्रसादादनुभूयत एवैतन्नात्रणास्यते उपविशत्वार्य्यः यथासनमुपविष्टौ
चाणक्यः वृषल किमर्थं वयमाहूताः राजा आर्य्यस्य दर्शनेनात्मानमनुगृहीतुं चाणक्यः स्मि
तं कृत्वा वृषल अलमनेन प्रश्रयेण न निष्प्रयोजनमाहूयन्ते भूपतिभिरधिकारिणस्तत्प्रयोजन ३२

CC-0. In Public Domain. Digitized by eGangotri

नमभिधीयतां राजा आर्य्य कौमुदीमहोत्सवप्रतिषेधस्य किं फलमार्य्यः पश्यति चाणक्यः स्मि
तं कृत्वा वृषल उपालब्धुं तर्हि वयमाहूताः राजा नोपालब्धुं किं तर्हि विज्ञापयितुं चाणक्यः वृष
ल यद्येवं तर्हि विज्ञापनीयानाम वश्यशिष्येण रुचयो नावरोद्धव्याः राजा आर्य्य कः संदेहः किंतु^
न कदाचिदपि आर्य्यस्य निष्प्रयोजना रुचिः प्रवर्त्तयिष्यति इतोस्ति नः प्रश्नावकाशः चाणक्यः
वृषल सम्यग्गृहीतवानसि न प्रयोजनमनपेक्ष्य स्वप्नेपि चाणक्यश्चेष्टते राजा आर्य्य अत ए
वं मां प्रयोजनशुश्रूषा मुखरयति अपापरं प्रयोजनं श्रोतुमिच्छामि चाणक्यः वृषल इह खल्वखि
लशास्त्रकारास्त्रिविधां सिद्धिमुपवर्णयंति तद्यथा राजायत्तां सचिवायत्तां उभयायत्तां चेति
तच्छचिवायत्तसिद्धेर्भवतः किं प्रयोजनानामन्वेषणेन वाऽस्मन्नेसे खेदयितुं वयमेवात्राभियुक्तं वेत
स्यामः राजा सकोपइव मुखं परिवर्त्तयति ततो नेपथ्ये वैतालिकौ पठतः आकाशं काशपुष्प^

CC-0. In Public Domain. Digitized by eGangotri

अधीनोसि भग्नापवर्त्तो इत्यमरः ३

छविमभिभवता भस्मना शुभ्रयंती शीतांशोरंशुजालैर्जलधरमलिनां क्लिश्नती कृत्तिमैभीं कापालीमु
द्वहंती स्रजमिव धवलां कौमुदीमित्यपूर्वां हासश्रीराजहंसा हरतु तनुरिव क्लेशमैशी शरद्वः १ अ
पि च प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणामात्मव्यापारगुर्वीजनितजललवा जृं चालन=२
संगत्रोटनैः=४ भितैः स्रांगभंगैः नागांकं मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं निद्राच्छेदाभिताम्रा चिर
मवतु हरेर्दृष्टिराकेकरा वः २ द्वितीयः सलोत्कर्षस्य धात्रा निधय इव कृताः कैंपिकस्यापि हेतो अनिर्वचनीया=५
र्जेतारः स्वेन धाम्ना मदसलिलमुचां नागयूथेश्वराणां दंष्ट्राभंगं मृगाणामधिपतय इव व्यक्त
मानावलेपा नाज्ञाभंगं सहंते नृवर नृपतयस्त्वादृशाः सार्वभौमाः ३ अपि च भूषणाद्युपभो
गेन प्रभुर्भवति न प्रभुः परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते ४ चाणक्यः आकर्ण्यात्मगतं ३३
अयमं तावद्विशिष्टदेवतारूपकेण प्रवृत्ताशीर्दर्शनमाशीर्वचने च इदमपरं किमित्यवधार

CC-0. In Public Domain. Digitized by eGangotri

यामीति विचिंत्य आः भवतु ज्ञातं राक्षसस्यायं प्रयोगः दुरात्मन् राक्षस हन्तकेद्दस्पस्ते खलु जा-
गर्त्ति जगति कौटिल्यः राजा आर्य्य वैहीनरे दीयतामाभ्यां सुवर्णशतसहस्रं कंचुकी यदाज्ञापयति
देव इति निष्क्रामति चाणक्यः सक्रोधं वैहीनरे तिष्ठ तिष्ठ न गंतव्यं वृषल किमयमस्थाने महानर्थो
त्सर्गः क्रियते राजा आर्येणैवं सर्वत्र निरुद्धचेष्टाप्रसरस्य मे बंधनमिव राज्यं न राज्यमिव चाण-
स्वव्यवहरतां=५ क्यः वृषल स्वयमनभियुक्तानां राज्ञामेते दोषा भवंति तदा यदि न सहसे ततः स्वयमभियुज्यस्व रा-
जा एते स्वकर्मण्यभियुज्यामहे चाणक्यः प्रियं नः वयमपि स्वकर्मण्यभियुज्यामहे राजा यद्येवं
तेन र्हि कौमुदीमहोत्सवानुष्ठानप्रतिषेधस्य किं प्रयोजनमिति तावच्छ्रोतुमिच्छामि चाणक्यः तर्हि
कौमुदीमहोत्सवकरणप्रयोजनं श्रोतुमिच्छामि राजा प्रथमं तावन्ममाज्ञाविघातः चाणक्यः वृष-
ल ममापि खलु त्वदाज्ञाया विघात एव कौमुदीमहोत्सवप्रतिषेधस्य प्रथमं प्रयोजनं कुतः श्रो-

CC-0. In Public Domain. Digitized by eGangotri

धीनां तमालप्रभवकिसलयश्यामवेलावनानामापारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितांतर्जलानां॥
मालेवाम्लानपुष्पा तवनृपतिशतैरुह्यते या शिरोभिः सामय्येवस्खलंती कथयति विनयालंकृतं ते प्र
भुत्वं १ राजा अथापरं प्रयोजनं श्रोतुमिच्छामि चाणक्यः तदपि कथयामि राजा कथ्यतां चाणक्यः
शोणोत्तरे महत्त्वनात्कायस्थमचलं ब्रूहि यत्तद्भद्रभटप्रभृतीनामालेख्यपत्रं तत्त्वावदीयतामिति प्र
यदार्य्य आज्ञाप यतीति ५ तीहारी जं अज्जो आणवेदिति निःक्रम्य पुनः प्रविश्य अज्ज इमं पत्तअं (आर्य इदं पत्रं) चाणक्यः गृहीत्वा वृषलश्रू
यतां राजा दत्तावधानोस्मि चाणक्यः वाचयति सुगृहीतनामधेयस्य देवस्य चंद्रगुप्तस्य सहोत्थायिनां
पुरुषाणां इतोऽपक्रम्य विषयस्थानान्मलयकेतुमाश्रितानां प्रमाणलेख्यं तत्र प्रथममेव तावद्गजा
ध्यक्षो भद्रभटः अश्वाध्यक्षः पुरुषदत्तः महाप्रतीहारश्चंद्रगुप्तभानोर्भागिनेयो डिंडिरातः देवस्य ३४
स्वजनमहाराजबलगुप्तस्सेवकुमारसेवकोराजसेनः सेनापतेः सिंहपालस्य भ्राता कनीयान्भागुरायः

CC-0. In Public Domain. Digitized by eGangotri

णः मालवराजपुत्रो रोहिताक्षः क्षत्रगणमुख्यो विजयवर्म्मेति एतावदेवमेतत् अत्र कः राजा आर्य्य
वैराग्यहेतुं=२ एतेषामपरागहेतुं ज्ञातुमिच्छामि चाणक्यः वृषल श्रूयतां अत्र यावेतौ गजाध्यक्षाश्वाध्यक्षौ भद्रभट
पुरुषदत्तनामानौ तौ स्त्रीमद्यमृगयाशीलौ हस्त्यश्वावेक्षणेष्वनभियुक्तौ इत्यधिकाराभ्यामवरो निस्तार्य्य=३
प्य मया स्वजीवनमात्रेणैव स्थापितौ इत्यपरक्तौ स्वेन स्वेनाधिकारेण व्यवस्थाप्य मलयकेतु-
माश्रितौ यौ चैतौ डिंगिरातबलगुप्तौ तावप्यतिलोभाभिभूतौ त्वद्दत्तं जीवनमबहु मन्यमानौ तत्र बहु लभ्यत
इति मलयकेतुमाश्रितौ योऽप्यसौ भवतः कुमारसेवको राजसेनः सोऽपि तव प्रसादादतिमात्रं कोशहस्त्यश्वं
सहसैव सुमहदैश्वर्य्यमवाप्य पुनरुच्छेदाशंकया परिक्रम्य मलयकेतुमाश्रितः योऽयमपरः सेनापते
स्सिंहबलस्य कनीयान्भ्राता भागुरायणः असावपि तत्र काले पर्वतकेन समुत्पन्नसौहार्द्दः स्नेहात्-
पिता ते चाणक्येन घातित इति तं रहसि त्रासयित्वा मलयकेतुमपवाहितवान् ततो भवदपथ्य
निःसारितवान् १

CC-0. In Public Domain. Digitized by eGangotri

कारिषु चंदनदासप्रभृतिषु निगृह्यमाणेषु दोषाशंकया परित्यज्य मलयकेतुमाश्रितः तेनाप्यसौ ममैतेन प्रा- मलयकेतुना
णैः परिरक्षित इति कृतज्ञतामनुवर्त्तमानेन पैतृकं च परिचयमात्मनोनंतरममात्यपदं ग्राहितः यौ वैतौ रो-
हिताक्षविजयवर्म्माणौ तावप्यत्यंतमानित्वात् स्वदायादेभ्यस्त्वया दीयमानं मानमसहमानौ मलयके-
तुमाश्रितौ इत्येषामपरागहेतवः राजा आर्य्य एवमेतेषु परिज्ञातापरागहेतुषु क्षिप्रमेव कस्मान्न प्र-
साधितं=५ तिविहितमार्य्येण चाणक्यः वृषल न पारितं प्रतिविधातुं राजा किमकौशलादुत प्रयोजनापे-
क्षया चाणक्यः वृषल श्रूयतामवधार्य्यतां प्रयोजनापेक्षया राजा प्रयोजनमप्रतिविधाने से-
दानीं श्रोतुमिच्छामि चाणक्यः वृषल श्रूयतां राजा उभयमपि क्रियते कथ्यतां चाणक्यः वृषल
इह खलु विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानं तद्यथा अनुग्रहो निग्रहश्च अनुग्रहस्ताव- ३५
त् आहिताधिकारयोर्भद्रभटपुरुषदत्तयोः पुनरधिकारारोपणमेव [illegible]व्यस-

CC-0. In Public Domain. Digitized by eGangotri

नयोगादनभियुक्तेषु पुनरारोप्यमाणः सकलराज्यस्य मूले हस्त्यश्वमवसादयति डिंडिराजबलगुप्तयोरत्यंतलुब्ध
प्रकृतिकयोः सकलराज्यसंप्रदानेनाप्यतुष्यतोरनुग्रहः कथं कर्तुं शक्यते राजसेनभागुरायणयोः स्वधनप्रा
णनाशभीतयोः कुतोऽनुग्रहस्यावकाश इति लोहिताक्षविजयवर्म्मणोरपि दायादमानप्रदानपीडयात
योरत्यंतमानिनोर्मानमप्यमानं मन्यमानयोः कीदृशोऽनुग्रहः प्रीतिजननीत्यर्थः इति परं हतः सर्वपक्षः अवसितः=
निग्रहोपि=५ उत्तरोपि खलु वयमचिरादधिगतनंदैश्वर्य्याः सहोत्थायिने प्रधानपुरुषमुल्बणदंडेन पीडयंतो नंद-
कुलानुरक्तप्रकृतीनामविश्वास्या भवाम इति अतः परं हता एव तदेवमनुगृहीतास्मत्पक्षो राक्ष-
सोपदेशप्रवणो महीयसा म्लेच्छबलेन परिवृतः पितृवधामर्षितः पर्वतकपुत्रो मलयकेतुरस्मान-
भियोक्तुमुद्यत इति सोयं व्यायामकालो न चोत्सवसुखकाल इति दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदी
महोत्सवेनेति प्रतिषिद्धः राजाह आर्य्य बहु प्रष्टव्यमत्र चाणक्यः विश्रब्धं पृच्छ ममापि बहु व्याख्येय
कालक्षेपसमयः=२

CC-0. In Public Domain. Digitized by eGangotri

मत्र राजा एष पृच्छामि चाणक्यः वृषल अहमप्येष कथयामि राजा आर्य सोप्यस्य सर्वस्यैवानर्थस्य
हेतुः मलयकेतुः कस्मादपक्रामन्नुपेक्षितः चाणक्यः वृषल अनपक्रमे द्वयी गतिः स्यात् निगृहीत
वा पूर्वं प्रतिश्रुतं राज्यार्द्धं वा प्रतिपाद्येत निग्रहे तावदस्य पर्वतकोऽस्माभिर्व्यापादित इति कृतघ्नतायाः
स्वयं हस्तोदत्तः स्यात् प्रतिश्रुत राज्यार्द्ध प्रतिपादनेपि पर्वतकविनाशः केवलमेव कृतघ्नतामात्र
फलं स्यादिति मलयकेतुरपक्रामन्नुपेक्षितः राजा आर्य अत्र तावदेवं राक्षसः पुनः इहैवान्तरे वर्त्त
मान आर्येणोपेक्षित इति अत्र किमुत्तरं आर्यस्य चाणक्यः वृषल राक्षसोपि खलु स्वामि नि
रानुबंधित्वात्सुचिरमेवात्र संवासाच्च शीलज्ञानानंदानुरक्तानां प्रकृतीनामत्यंत विश्वास प्राप्ता
पुरुषकाराभ्यामुपेतः सहायसंपदा युक्तः कोशवान् इहैवांतर्नगरे वर्त्तमानो निगृह्यमाणेन स्व ३६
लुमहांतमंतः कोपमुत्पादयेत् दूरीकृतस्तु वाह्यकोपमुत्पादयन्नपि न दुःसाध्यो भविष्यति । इत्य

CC-0. In Public Domain. Digitized by eGangotri

नयोगादनभियुक्तेषु पुनरारोप्यमाणः सकलराज्यस्य मूलं हस्त्यश्वमवसादयति डिंडिराणवलगुप्तयोरत्यंतलुब्ध
प्रकृतिकयोः सकलराज्यसंप्रदानेनाप्यतुष्यतोरनुग्रहः कथं कर्तुं शक्यते राजसेनभागुरायणयोः स्वधनप्रा
णनाशभीतयोः कुतोऽनुग्रहस्यावकाश इति लोहिताक्षविजयवर्म्मणोरपि दायादमानप्रदानपीड्यात
योरत्यंतमानिनोर्मानमप्यमानं मन्यमानयोः कीदृशोऽनुग्रहः प्रीतिं जनयिष्यतीति इति परं हतः सर्वपक्षः अवसितः ==
निग्रहोपि = ५ उत्तरोपि खलु वयमचिरादधिगतनन्दैश्वर्य्याः सहोत्थायिनं प्रधानपुरुषमुल्बणदंडेन पीडयंतोनंद-
कुलानुरक्तप्रकृतीनामविश्वास्या भवाम इति अतः परं हतमेव तदेवमनुगृहीतास्मत्पक्षो राक्ष-
सोपदेशप्रवणो महीयसा म्लेछबलेन परिहतः पितृवधामर्षितः पर्वतकपुत्रो मलयकेतुरस्मान-
भियोक्तुमुद्यत इति सोयं व्यायामकालो न चोत्सवसुखकाल इति दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदी
महोत्सवेनेति प्रतिषिद्धः राजा ह आर्य्य बहु प्रष्टव्यमत्र चाणक्यः विस्रब्धं पृच्छ ममापि बहु आख्येय
कालक्षेपतमयः =२

CC-0. In Public Domain. Digitized by eGangotri

तोऽपाक्रमन्नुपेक्षितः राजा तत्किमर्थमत्रस्थ एवोपायैर्नोपक्रान्तः (उद्यतः) कथं ननूपक्रान्तो भविष्यति ननूपा-
यैरेवाऽसौ हृदये शल्यः शंकुरिवोद्धृत्य दूरीकृतः दूरीकरणस्योक्तं प्रयोजनं राजा आर्य्य कस्माद्वा विक्र-
म्य न गृहीतः चाणक्यः वृषल राक्षसः खल्वसौ विक्रम्य निगृह्यमाणः स्वयं वा नश्येत् युष्मद्बलानि
वा विनाशयेत् एवं सत्युभयथापि दोषः पश्य स हि भृशमभियुक्तो यद्युपेयाद्विनाशं ननु वृषल वियुक्त-
स्तादृशेनापि पुंसा अथ न च बलमुख्यान्घातयेत्सापि पीडा वनगज इव तस्मात्सोऽभ्युपायैर्विनेयः राजा
न शक्नुमो वयमार्य्यस्य मतिमतिशयितुं सर्वथा चायममात्यराक्षस एवात्र प्रशस्यतरः चाणक्यः सक्रोधं
न भवानिति वाक्यशेषः भो वृषल तेन किं कृतं राजा यदि न ज्ञायते तर्हि श्रूयतां तेन खलु महात्मना
कृतायां पुरि यावदिष्टमुषितं कृत्वा पदं नो गले व्याघातो जयघोषणादिषु बलादस्मद्बलानां कृतः ॥
अत्यर्थं विपुलैः स्वनीतिविभवैः संमोहमापादिता विश्वास्येष्वपि विश्वसंति मतयो न स्वेषु वर्गेषु नः ॥ वा

CC-0. In Public Domain. Digitized by eGangotri

णक्यः विहस्य वृषल एतत्कृतं राक्षसेन राजा एतत्कृतं अमात्यराक्षसेन चाणक्यः वृषलं मया पुनर्जीतं
नंदमिव भवंतमुद्धृत्य भवानिव भूतले मलयकेतू राजाधिराजपदमारोपितः। राजा अन्येनैवमनुष्ठितं किं
मंत्रार्थस्य चाणक्यः हे मत्सरिन् आरुह्यारूढकोपस्फुरणविषमिताग्रांगुलीमुक्तचूडां लोकप्रत्यक्षमु
ग्रां सकलरिपुकुलोच्छेददीर्घां प्रतिज्ञां केनान्येनावलिप्ता नवनवतिशतद्रव्यकोटीश्वरास्ते नंदाः पर्याय
भूताः पशवइव हताः पश्यतो राक्षसस्य १ अपिच गृध्रैरानद्धचक्रं वियति विलनतादीर्घविष्कंपपक्षैः
धूमध्वस्तार्कभासां सघनमिव दिशां मंडलं मंडयंतः नंदानानंदयंतः पितृवनिलयान्प्राणिनः पश्यचैतान्
निर्वान्त्यद्यापि नैते स्रुतबहलवसावाहिनो हव्यवाहाः १ राजा अन्येनैवेदमनुष्ठितं चाणक्यः केन
राजा नंदकुलद्वेषिणा दैवेन चाणक्यः दैवमविद्वांसः प्रमाणयंति राजा विद्वांसोप्यविकत्थना भवं ३७
ति चाणक्यः सकोपं वृषल भृत्यमिव मामारोढुमिच्छसि शिखां मोक्तुं वद्धामपि पुनरयं धावति करः

ऽश्लाध्याः २२

CC-0. In Public Domain. Digitized by eGangotri